५.१

।। ओं श्रीगणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

।। कूश्माण्ड मन्त्राः ।।

।। ब्रह्मयज्ञविधिश्च ।।


(तैत्तिरीयारण्यके द्वितीयः प्रश्नः)



For copies of this book please contact-
S.Parameswaran
14/52 Manjula, Pestom Sagar
Chembur, Mumbai - 400 089
Tel: 524 2155.



॥ श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ॥




श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक सर्वतन्त्रस्वतन्त्रादिराजधानीविद्यानगरमहाराजधानीकर्णाटकसिंहासनप्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामिगुरुकरकमलसञ्जात

॥ श्री जगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थस्वामिभिः ॥

अस्मदत्यन्तप्रियशिष्यश्रीपरमेश्वरशर्मविषये नारायणस्मरणपुरस्सरं विरचिता आशिषस्समुल्लसन्तु।

भवन्तः वेदमधीत्य शिष्यानध्यापयन्तः अधुना लोकाना

SRI GURUBHYO NAMAHA






MUTUAL TRUST — FRIENDSHIP — TOLERANCE—OUR TRADITION

Sri Sankara Jayanthi Celebration Committee

6, Savitha, 70,Pestomsagar, 2nd Road, Tilaknagar P.O., BOMBAY - 89.
Tel. Nos. : 5241864

Date . .

FOREWORD

Shri Parameswara Sharma has been conducting Veda Classes in Pestom Sagar Chembur, for over two decades, and has trained over a hundred vidyarthis comprising of a wide range of asthikas covering school children, college boys, office-goers and retired elders. He has been associated with our Shri Sankara Jayanthi Celebration Committee for the past 16 years conducting Rudra-japa-abhisheka-puja along with his disciples.

Shri Parameswara Sharma's teaching skill and the recitation of vedic hymns by his disciples have been appreciated by many eminent vedic scholars and patrons of Religious & Cultural Organisations.

A momentous occasion was in June 1994, when, pleased with the excellent Ghana recitation by a few of Parameswara Sharma's young disciples,and in appreciation of his glorious spiritual service,HisHoliness Shri Bharathi Theertha Swamigal, Sringeri Mutt blessed and honoured him with a *'Ponnadai'*.

Besides conducting veda classes, Shri Parameswara Sharma devotes his available time in compiling Vedic Literature into convenient books, in bold print, very useful to vidyarthis and religious practioners. He has compiled the following books :-

RUDRAM -CHAMAKAM
RUDRA KRAMAM
CHAMAKA KRAMAM
MAHANYASAM
UDAKA SHANTHI
ACHIDRAM
ASWAMEDHAM (1)


Copies of books compiled by Parameswara Sharma were presented to HIS HOLINESS SHRI BHARATHI THEERTHA SWAMIGAL, for His approval & blessings. His Holiness has gone through the books and has expressed His happiness and said that the books are very good and would be useful to the students

Appreciating his effort & dedication, His Holiness has blessed Shri Parameswara Sharma with a *SHREEMUKHAM.*

I, on behalf of the Sri Sankara Jayanthi Celebration Committee, pray to Almighty to bestow upon Shri Parameswara Sharma, a healthy, blissful and long life to continue his noble social service of propagating Vedas and Vedic Culture among the youth and active citizens.

V. Venkitachalam
Secretary
Sri Sankara Jayanthi Celebration Committee

13th September 1999.



श्री परमेश्वर शर्मा ।।

।। ओं श्रीगणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

।। कूश्माण्ड मन्त्राः ।।

।। ब्रह्मयज्ञविधिश्च ।।

(तैत्तिरीयारण्यके द्वितीयः प्रश्नः)



For copies of this book please contact-
S.Parameswaran
14/52 Manjula, Pestom Sagar
Chembur, Mumbai - 400 089
Tel: 524 2155.

श्रीगणेश शारदा गुरुभ्यो नमः।

श्री वेदव्यासाय नमः।

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

।। विषयानुक्रमणिका ।।

श्रीगणेश शारदा गुरुभ्यो नमः।
श्री वेदव्यासाय नमः।

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

।। विषयानुक्रमणिका ।।

****

श्रीगणेश शारदा गुरुभ्यो नमः।
श्री वेदव्यासाय नमः।

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

हरिः ओ(४)म्

नमो ब्रह्मणे नमो अस्त्वग्नये
नमः पृथिव्यै नम ओषधीभ्यः।
नमो वाचे नमो वाचस्पतये
नमो विष्णवे बृहते करोमि।।
ओं शान्तिश्शान्तिश्शान्तिः।।

।। तैत्तिरीयारण्यके द्वितीयःप्रश्नः ।।

१ सह वै देवानाञ्चासुराणाञ्च यज्ञौ प्रततावास्ता व्वँयꣳ स्वर्गल्लँोकमेष्यामो वयमेष्याम इति तेऽसुरा स्सन्नह्य सहसैवाचरन्ब्रह्मचर्येण तपसैव देवास्तेऽसुरा अमुह्यꣳस्ते न प्राजानꣳस्ते पराऽभवन्ते न स्वर्गल्लँोकमायन्प्रसृतेन वै यज्ञेन देवा स्स्वर्गलँोकमायन्नप्रसृतेनासुरान्पराऽभावयन्प्रसृतो ह वै यज्ञोपवीतिनो यज्ञो प्रसृतोऽनुपवीतिनो यत्किञ्च ब्राह्मणो यज्ञोपवीत्यधीते यजत एव तत्तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

यज्ञस्य प्रसृत्या अजिन-व्वाँसो वा दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीत ँ सव्वीतं मानुषम् ।। [१] ।। *****

२ रक्षा ँ सि हवा पुरोऽनुवाके तपोग्रमतिष्ठन्त तान्प्रजापति-र्वरेणोपामन्त्रयत तानि वरमवृणीतादित्यो नो योद्धा इति तान्प्रजापति-रब्रवी-द्योधयद्ध्वमिति तस्मा-दुत्तिष्ठन्त ँ हवा तानि रक्षा ँ स्यादित्य-य्योँधयन्ति यावदस्तमन्वगात्तानि हवा एतानि

॥ तैत्तिरीयारण्यके द्वितीयःप्रश्नः ॥

रक्षाꣳसि गायत्रियाऽभिमन्त्रितेनांभसा शाम्यन्ति तदु हवा एते ब्रह्मवादिनः पूर्वाभिमुखा स्सन्ध्यायाङ्गायत्रियाऽभिमन्त्रिता आप ऊद्ध्र्व-व्विँक्षिपन्ति ता एता आपो वज्री भूत्वा तानि रक्षाꣳसि मन्देहारुणे द्वीपे प्रक्षिपन्ति यत्प्रदक्षिणं प्रक्रमन्ति तेन पाप्मान-मवधून्वन्त्युद्यन्त-मस्तयँन्त-मादित्य-मभिद्ध्यायन्कुर्वन्ब्राह्मणो विद्वान्थ्सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैव सन्ब्रह्माप्येति य एवव्वेँद ॥[२]॥

*****

।। तैत्तिरीयारण्यके द्वितीयःप्रश्नः ।।

३ यद्देवा देवहेळन-न्देवासश्चकृमा वयम्। आदित्या- स्तस्मान्मा- मुञ्चत- र्तस्यर्तेन मामित।।

देवा जीवनकाम्या यद्वाचाऽनृतमूदिम। तस्मान्न इह मुञ्चतविश्वे देवा-स्सजोषसः।।

ऋतेन द्यावापृथिवी ऋतेन त्वꣳसरस्वति। कृतान्नः पाह्येनसो यत्किञ्चानृतमूदिम।।

इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः। ते नो मुञ्चन्त्वेनसो यदन्यकृत- मारिम।।

सजातशꣳ सादुत जामिशꣳ साज्ज्यायस-
श्शꣳसादुतवा कनीयसः। अनाधृष्टन्देवकृत-
य्यँदेन-स्तस्मात्त्वमस्मा-ञ्जातवेदो मुमुग्धि। [३]।

यद्वाचा यन्मनसा बाहुभ्यामूरुभ्या-
मष्ठीवद्भ्याꣳ शिश्नेर्यदनृतञ्चकृमा वयम्।
अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु
चकृम यानि दुष्कृता।।

येन त्रितो अर्णवान्निर्बभूव येन सूर्यन्तमसो
निर्मुमोच। येनेन्द्रो विश्वा अजहादराती-
स्तेनाहञ्ज्योतिषा-ज्योतिरानशान आँक्षि।।

।। तैत्तिरीयारण्यके द्वितीयःप्रश्नः ।।

यत्कुसीदमप्रतीत्तं मयेह येन यमस्य निधिना चरामि। एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रतितत्ते दधामि।।

*यन्मयि माता यदापिपेष यदन्तरिक्ष-य्यँदाशसा-तिक्रामामि त्रिते देवा दिविजाता यदाप इमं मे वरुण तत्त्वा यामि त्वन्नो अग्ने सत्त्वन्नो अग्ने त्वमग्ने अयासि।। [४]।।

(मुमुग्धि सप्त च)।।

******

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

*[यन्मयि माता गर्भे सत्येनश्चकार यत्पिता। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम करोतु मामनेनसम्।।

यदापिपेष मातरं पितरं पुत्रः प्रमुदितो धयन्। अहिंसितौ पितरौ मया तत्तदग्ने अनृणो भवामि।।

यदन्तरिक्षं पृथिवीमुतद्यां यँन्मातरं पितरं वाजिहिंसिम। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम

।। तैत्तिरीयारण्यके द्वितीय प्रश्नः ।।

करोतु मामनेनसम् ।।

यदाशसा निशसा यत्पराशसा यदेनश्चकृमा नूतन य्यँत्पुराणम्। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम करोतु मामनेनसम् ।।

अतिक्रामामि दुरित य्यँदेनो जहामि रिप्रं परमे सधस्थे। यत्र यन्ति सुकृतो नापि दुष्कृतस्तमारोहामि सुकृतान्नु लोकम् ।।

त्रिते देवा अमृजतैतदेनस्त्रित एतन्मनुष्येषु मामृजे। ततो मा यदि किञ्चिदानशेऽग्नि-

र्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम करोतु मामनेनसम्।।

दिवि जाता अफ्सु जाता या जाता ओषधीभ्यः। अथो या अग्निजा आपस्तान- श्शुन्धन्तु शुन्धनीः।।

यदापो नक्तन्दुरितञ्चराम यद्वा दिवा नूतनय्यँत्पुराणम्। हिरण्यवर्णास्तत उत्पुनीतनः।

इमं मे वरुण श्रुधीहवमद्या च मृळय। त्वामवस्युराचके।।

तत्त्वायामि ब्रह्मणा वन्दमान-स्तदाशास्ते

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

यजमानो हविर्भिः। अहेळमानो वरुणेह
बोद्ध्युरुशꣳस मान आयुः प्रमोषीः।।......
त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य
हेळोऽव यासिसीष्ठाः। यजिष्ठो वह्नितम-
श्शोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्द्ध्यस्मत्।
सत्त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो
अस्या उषसो व्युष्टौ। अवयक्ष्वनो वरुणꣳ
रराणो वीहि मृळीकꣳसुहवो न एधि।।
त्वमग्ने अयास्ययासन्मनसा हितः।
अयासन् हव्यमूहिषेऽयानो धेहि भेषजम्]।।

*****

।। तैत्तिरीयारण्यके द्वितीयःप्रश्नः ।।

४ यददीव्यन्नृणमहं बभूवादित्सन्वा सञ्जगर जनेभ्यः। अग्निर्मा तस्मादिन्द्रश्च सँविदानौ प्रमुञ्चताम्।।

यद्धस्ताभ्याञ्चकर किल्बिषाण्यक्षाणाँ-वँग्नुमुपजिघ्नमानः। उग्रं पश्याच राष्ट्रभृच्च तान्यफ्सरसावनुदत्तामृणानि।।

उग्रं पश्ये राष्ट्रभृत्किल्बिषाणि यदक्षवृत्तमनुदत्तमेतत्। नेन्न ऋणानृणव इथ्समानो यमस्य लोके अधिरज्जुराय।।

*अवते हेळ उदुत्तममिमं मे वरुण तत्त्वा

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

यामि त्त्वन्नो अग्ने सत्त्वन्नो अग्ने।।

*[अवते हेळो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः। क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनाꣳसि शिश्रथः कृतानि।।

उदुत्तम व्वँरुणपाशमस्मदवाधम व्विँमद्ध्यमꣳ श्रथाय। अथा वयमादित्यव्व्रते तवानागसो अदितये स्याम।।

इमं मे वरुण ... ११ पुटे]।।

सङ्कुसुको विकुसुको निर्ऋथो यश्च निस्वनः। तेऽ (१) स्मद्यक्ष्ममनागसो

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

दूराद्दूरमचीचतम् ।।

निर्यक्ष्ममचीचते कृत्यान्निर्ऋतिञ्च ।

तेनयो(१)स्मथ्समृच्छातै तमस्मै प्रसुवामसि ।।

दुश्श ँ सानुश ँ साभ्याँङ्घणेनानुघणेन च ।

तेनान्योऽ(१)स्मथ्समृच्छातै तमस्मै प्रसुवामसि ।

सर्व्वँर्चसा पयसा सन्तनूभिरगन्महि

मनसा स ँ शिवेन । त्वष्टा नो अत्र विदधातु

रायोऽनुमार्ष्टु तन्वो(१)यद्विलिष्टम् ।। [५] ।।

(कृत्यान्निर्ऋतिञ्च पञ्च च) ।।

*****

५ आयुष्टे विश्वतो दधदयमग्नि-
र्वरेण्यः। पुनस्ते प्राण आयाति परा यक्ष्मँ
सुवामि ते।।

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको
घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं
पितेव पुत्रमभिरक्षतादिमम्।।

इममग्न आयुषे वर्चसे कृधि तिग्ममोजो
वरुण सँशिशाधि। मातेवास्मा अदिते शर्म
यच्छ विश्वे देवा जरदष्टि र्यथाऽसत्।।

अग्न आयूँषि पवस आसुवोर्ज-
मिषञ्चनः। आरेबाधस्व दुच्छुनाम्।।

अग्ने पवस्व स्वपा अस्मे वर्चस्सुवीर्यम्।
दधद्रयिं मयि पोषम्।। [६]।।

अग्निर्ऋषिः पवमानः पाञ्चजन्यः
पुरोहितः। तमीमहे महागयम्।।

अग्ने जातान्प्रणुदान- स्सपत्ना-
न्प्रत्यजाता- ञ्जातवेदो नुदस्व। अस्मे दीदिहि
सुमना अहेळन्त्छर्मन्ते स्याम त्रिवरूथ
उद्भौ।।

सहसा जातान् प्रणुदान- स्सपत्नान्
प्रत्यजाताञ्जातवेदो नुदस्व। अधि नो ब्रूहि
सुमनस्यमानो वयꣳस्याम प्रणुदानस्सपत्नान्।

अग्ने योनोऽभितो जनो वृको वारो
जिघाꣳसति। ताꣳ स्त्वव्वृँत्रहञ्जहि वस्व-
स्मभ्यमाभर।।

अग्ने योनोऽभिदासति समानो यश्च
निष्ट्यः। तव्वँयꣳ समिधङ्कृत्वा तुभ्य-
मग्नेऽपि दद्ध्मसि।। [७]।।

यो नश्शपादशपतो यश्च नश्शपतश्शपात्।

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

उषाश्च तस्मै निम्रुक्च सर्वं पापꣳ समूहताम्॥

यो नस्सपत्नो यो रणो मर्तोऽभिदासति देवाः। इद्ध्मस्येव प्रक्षायतो मातस्योच्छेषि किञ्चन।।

यो मान्द्वेष्टि जातवेदो यञ्चाहन्द्वेष्मि यश्च माम्। सर्वाꣳ स्तानग्ने सन्दह याꣳ श्चाहन्द्वेष्मि ये च माम्।।

यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः। निन्दाद्यो अस्मान्दिफ्साच्च सर्वाꣳ स्तान्मष्मषा कुरु।।

।। तैत्तिरीयारण्यके द्वितीयःप्रश्नः ।।

संशितं मे ब्रह्म संशित व्वीर्या(१)म् बलम्। संशितङ्क्षत्रं मे जिष्णु यस्याह-मस्मि पुरोहितः।।

उदेषां बाहू अतिरमुद्वर्चो अथो बलम्। क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि स्वा(२)म् अहम्।।

पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः पुनश्श्रोत्रम्म आगात्पुनः प्राणः पुनराकूतम्म आगात्पुनश्चित्तं पुनराधीतम्म आगात्। वैश्वानरो मेऽदब्ध स्तनूपा अवबाधता-

न्दुरितानि विश्वा।।[८]।।

(पोषन्दध्मसि पुरोहितश्चत्वारि च)।।

६ वैश्वानराय प्रतिवेदयामो यदीनृणꣳ
संङ्गरो देवतासु। स एतान्पाशान् प्रमुचन्
प्रवेद स नो मुञ्चातु दुरितादवद्यात्।।

वैश्वानरः पवयान्नः पवित्रै र्यथ्संङ्गरमभि
-धावाम्याशाम्। अनाजानन्मनसा याचमानो
यदत्रैनो अवतथ्सुवामि।।

अमीये सुभगे दिवि विचृतौ नामतारके।
प्रेहामृतस्य यच्छतामेतद्- बद्धकमोचनम्।।

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

विजिहीर्ष्व लोकान्कृधि बन्धान्मुञ्चासि बद्धकम्। योनेरिव प्रच्युतो गर्भस्सर्वान्पथो अनुष्व।।

सप्रजानन् प्रतिगृभ्णीत विद्वान्प्रजापतिः प्रथमजा ऋतस्य। अस्माभिर्दत्तञ्जरसः परस्तादच्छिन्नन्तन्तुमनुसञ्चरेम।। [१]।।

ततन्तन्तुमन्वेके अनुसञ्चरन्ति येषान्दत्तं पित्र्यमायनवत्। अबन्ध्वेके ददतः प्रयच्छा-द्दातुञ्चेच्छकनवाँस-स्स्वर्ग एषाम्।।

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

आरभेथामनु सꣳरभेथाꣳसमानं पन्थामवथो घृतेन। यद्वां पूर्तं परिविष्टं य्यँदग्नौ तस्मै गोत्रायेह जायापती सꣳरभेथाम्।।

यदन्तरिक्षं पृथिवीमुतद्यां य्यँन्मातरं पितरं व्वाँजिहिꣳसिम। अग्निर्मा तस्मादेनसो गार्हपत्य उन्नोनेषद्दुरिता यानि चकृम।।

भूमिर्माताऽदितिर्नो जनित्रं भ्राताऽन्तरिक्षमभिशस्त एनः। द्यौर्नः पिता पितृयाच्छं भवासि जामिमित्वामाविवित्सि लोकात्।।

यत्र सुहार्दस्सुकृतो मदन्ते विहाय

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

रोगन्तन्वा(१)ँस्वायाम्। अश्लोणाङ्गैरह्रुता-
स्स्वर्गे तत्र पश्येम पितरञ्च पुत्रम्।।

यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा
करिष्यन्। यद्देवानाञ्चक्षुष्यागो अस्ति यदेव
किञ्च प्रतिजग्राहमग्निर्मा तस्मादनृणङ्-
कृणोतु।।

यदन्नमद्मि बहुधा विरूप ँवासो
हिरण्यमुत गामजामविम्। यद्देवानाञ्चक्षुष्यागो
अस्ति यदेव किञ्च प्रतिजग्राहमग्निर्मा तस्मा-
दनृणङ्कृणोतु।।

यन्मया मनसा वाचा कृतमेनः कदाचन।
सर्वस्मात्तस्मान्मेळितो मोग्धि त्वꣳ हि वेत्थ
यथातथम्।। [१०]।। (चरेम पुत्रꣳषट्च)।।

*****

७ वातरशना हवा ऋषयश्श्रमणा
ऊर्ध्वमन्थिनो बभूवुस्तानृषयोऽर्थमायꣳ स्ते
निलायमचरꣳ स्तेऽनु प्रविशुः कूश्माण्डानि
ताꣳ स्तेष्वन्वविन्दन्छ्रद्धया च तपसा च
तानृषयो ऽब्रुवन्कथा निलायञ्चरथेति त
ऋषीनब्रुवन्नमो वो ऽस्तुभगवन्तोऽस्मिन्धाम्नि

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

केन वस्सपर्यामेति तानृषयोऽब्रुवन्पवित्रन्नो ब्रूत येनारेपसस्स्यामेति त एतानि सूक्तान्यपश्यन् यद्देवा देवहेळनँय्यददीव्यन्नृणमहं बभूवायुष्टे विश्वतो दधदित्येतैराज्यञ्जुहुत वैश्वानराय प्रतिवेदयाम इत्युपतिष्ठत यदर्वाचीनमेनो भ्रूणहत्याया-स्तस्मान्मोक्ष्यदध्व इति त एतैरजुहवुस्ते रेपसोऽभवन्कर्मादिष्वेतै र्जुहुयात्पूतो देवलोकान् थ्समश्नुते।। [११]।।

*****

८ कूश्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यथास्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतस्सिञ्चति यदर्वाचीनमेनो भ्रूणहत्याया-स्तस्मान्मुच्यते यावदेनो दीक्षामुपैति दीक्षित एतैस्सततिं जुहोति सव्ँवथ्सरन्दीक्षितो भवति सव्ँवथ्सरादेवात्मानं पुनीते-

मासन्दीक्षितो भवति यो मासस्स सव्ँवथ्सर- स्सव्ँवथ्सरादेवात्मानं पुनीते-

चतुर्विंशतिꣳरात्री र्दीक्षितो भवति

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

चतुर्वि॑ꣳशतिरर्द्धमासा-स्संव्वँथ्सर-
स्संव्वँथ्सरादेवात्मानं पुनीते-
द्वादशरात्री दीक्षितो भवति द्वादशमासा
स्संव्वँ थ्सर- स्संव्वँथ्सरादेवात्मानं पुनीते-
षड्रात्री दीक्षितो भवति षड्वा ऋतव
स्संव्वँथ्सर स्संव्वँथ्सरादेवात्मानं पुनीते-
तिस्रो रात्री दीक्षितो भवति त्रिपदा गायत्री
गायत्रिया एवात्मानं पुनीते-
न मा॑ꣳसमश्नीयान्न स्त्रियमुपेया-
न्नोपर्यासीत जुगुप्सेतानृतात्पयो ब्राह्मणस्य

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

व्रत य्ँयवागूराजन्यस्यामिक्षा वैश्यस्याथो सौम्येऽप्यध्वर एतद्व्रतं ब्रूयाद्यदि मन्येतोपदस्यामीत्योदनन्धानास्सक्तून्घृतमित्यनुव्रतयेदात्मनोऽनुपदासाय।। [१२] ।।

*****

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

१ अजान् हवै पृश्नीँ
स्तपस्यमानान् ब्रह्मस्वयँभ्वभ्यानर्षत्त
ऋषयोऽभवन्तदृषीणा- मृषित्व- न्तान्देवता-
मुपातिष्ठन्त यज्ञकामास्त एतं ब्रह्मयज्ञ-
मपश्य-न्तमाहरन्तेनायजन्त यदृचोऽद्ध्यगीषत
ताः पयं आहुतयो देवानामभवन् यद्यजूँषि
घृताहुतयो यथ्सामानि सोमाहुतयो
यदथर्वाङ्गिरसो मद्ध्वाहुतयो यद्ब्राह्मणानी-
तिहासान्पुराणानि कल्पान्गाथा नाराशँसी-
र्मेदाहुतयो देवाना- मभवन्ताभिः क्षुधं

पाप्मानमपाघ्न- न्नपहतपाप्मानो देवास्स्वर्ग-
ल्ँल्लोकमायन् ब्रह्मण स्सायुज्यमृषयोऽगच्छन्न् ।।
[१३] ।। **********

१० पञ्च वा एते महायज्ञा स्सतति
प्रतायन्ते सतति सन्तिष्ठन्ते देवयज्ञः पितृयज्ञो
भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति-

यदग्नौ जुहोत्यपि समिधन्तद्देवयज्ञ
स्सन्तिष्ठते-

यत्पितृभ्य स्स्वधाकरोत्यप्यप-स्तत्पितृयज्ञ
स्सन्तिष्ठते-

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

यद्भूतेभ्यो बलिँहरति तद्भूतयज्ञ
स्सन्तिष्ठते-

यद्ब्राह्मणेभ्योऽन्नन्ददाति तन्मनुष्ययज्ञ
स्सन्तिष्ठते-

यथ्स्वाद्ध्यायमधीयीतैका- मप्यृच य्यँजु
स्साम वा तद्ब्रह्मयज्ञ स्सन्तिष्ठते-

यदृचोऽधीते पयसः कूल्या
अस्यपितृन्थ्स्वधा अभिवहन्ति-

यद्यजूँषि घृतस्य कूल्या यथ्सामानि
सोम एभ्यः पवते-

यदथर्वाङ्गिरसो मधोः कूल्या
यद्ब्राह्मणानी-तिहासान्पुराणानि कल्पान्गाथा
नाराशꣳसी र्मेदसः कूल्या अस्य पितृन्थ्स्वधा
अभिवहन्ति-

यदृचोऽधीते पय आहुतिभिरेव तद्देवाꣳ
स्तर्पयति-

यद्यजूꣳषि घृताहुतिभि - र्यथ्सामानि
सोमाहुतिभि - र्यदथर्वाङ्गिरसो मद्ध्वा-
हुतिभि-

र्यद्ब्राह्मणानी- तिहासान्पुराणानि

कल्पान्गाथा नाराशꣳसी र्मेदाहुतिभिरेव तद्देवाꣳस्तर्पयति-

त एनन्तृप्ता आयुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्ति।। [१४]।।

*****

११ ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यान्दिशि ग्रामादछदि दर्श उदीच्यां प्रागुदीच्यावोँदित आदित्ये दक्षिणत उपवीयोपविश्य हस्तावववनिज्य त्रिराचामेद्द्विः

परिमृज्य सकृदुपस्पृश्य शिरश्चक्षुषी नासिके
श्रोत्रे हृदयमालभ्य यत्त्रिराचामति तेन ऋचः
प्रीणाति यद्द्विः परिमृजति तेन यजूꣳषि
यथ्सकृदुपस्पृशति तेन सामानि यथ्सव्यं पाणिं
पादौ प्रोक्षति यच्छिरश्चक्षुषी नासिके श्रोत्रे
हृदयमालभते तेनाथर्वाङ्गिरसो ब्राह्मणानी-
तिहासान्पुराणानि कल्पान्गाथा नाराशꣳसीः
प्रीणाति दर्भाणां महदुपस्तीर्योपस्थङ्कृत्वा
प्राङासीन-स्स्वाद्ध्याय- मधीयीतापा ँवा एष
ओषधीनाꣳरसो यद्दर्भास्सरसमेव ब्रह्मकुरुते

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

दक्षिणोत्तरौ पाणीपादौ कृत्वा सपवित्रावोमिति प्रतिपद्यत एतद्वै यजुस्त्रयीव्विँद्यां प्रत्येषा वागेतत्परममक्षर- न्तदेतदृचा- ऽभ्युक्तमृचो अक्षरे परमे व्योमन् यस्मिन्देवा अधिविश्वे निषेदु यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत इति त्रीनेव प्रायुङ्क्त भूर्भुवस्स्वरित्याहैतद्वै वाचस्सत्य-य्यदेव वाच-स्सत्यन्तत् प्रायुङ्क्ताथ सावित्रीङ्गायत्री-न्त्रिरन्वाह पच्छोऽर्द्धर्चशो नवानँ सविता श्रियः प्रसविता श्रियमेवाप्नोत्यथो प्रज्ञातयैव

प्रतिपदा छन्दाꣳसि प्रतिपद्यते।। [१५]।।

*****

१२ ग्रामे मनसा स्वाद्ध्याय-
मधीयीत दिवा नक्तव्वेँति हस्माह शौच
आह्नेय उतारण्ये बल उत वाचोततिष्ठन्नुत
व्रजन्नुतासीन उत शयानो ऽधीयीतैव
स्वाद्ध्यायन्तपस्वी पुण्यो भवति य
एवव्विँद्वान् थ्स्वाद्ध्यायमधीते नमो ब्रह्मणे
नमो अस्त्वग्नये नमः पृथिव्यै नम
ओषधीभ्यः। नमो वाचे नमो वाचस्पतये

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

नमो विष्णवे बृहते करोमि ।। [१६] ।।

*****

१३ मद्ध्यन्दिने प्रबलमधीयीतासौ
खलु वावैष आदित्यो यद्ब्राह्मण स्तस्मात्तर्हि
तेऽक्ष्णिष्ठन्तपति तदेषाऽभ्युक्ता। चित्रन्देवाना-
मुदगादनीकञ्चक्षु र्मित्रस्य वरुणस्याग्नेः।
आप्राद्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा
जगतस्तस्थुषश्चेति सवा एष यज्ञस्सद्यः
प्रतायते सद्यस्सन्तिष्ठते तस्य प्राक्सायं-
मवभृतो नमो ब्रह्मण इति परिधानीयान्

त्रिरन्वाहाप उपस्पृश्य गृहानेति ततो यत्किञ्च ददाति सा दक्षिणा।। [१७]।।

*****

१४ तस्य वा एतस्य यज्ञस्य मेघो हविर्द्धानं विँद्युदग्नि वर्षꣳ हवि स्स्तनयित्नु र्वषट्कारो यदवस्फूर्जति सोऽनुवषट्कारो वायुरात्मा ऽमावास्या स्विष्टकृद्य एव विँद्वान्मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वायावमावास्यायाꣳस्वाद्ध्यायमधीते तप एव तत्तप्यते तपो हि स्वाद्ध्याय

इत्युत्तमन्नाकꣳ रोहत्युत्तम-स्समानानां भवति
यावन्तꣳ ह्वा इमाव्विँत्तस्य पूर्णान्ददत्स्वर्ग-
ल्लँोकञ्जयति तावन्तल्लँोकञ्जयति
भूयाꣳ सञ्चाक्षय्य-ञ्चापपुनर्मृत्युञ्जयति
ब्रह्मणस्सायुज्यङ्गच्छति ।।[१८] ।।

*****

१५ तस्य वा एतस्य यज्ञस्य
द्वावनदध्यायौ यदात्माऽशुचि-र्यद्देशस्समृद्धि-
दैवतानि य एवव्विँद्वान्महारात्र उषस्युदिते
व्रजꣳस्तिष्ठन्नासीन श्शयानोऽरण्ये ग्रामे वा

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

यावन्तरसꣳस्वाद्ध्यायमधीते सर्वाल्ँल्लोका-
ञ्जयति सर्वाल्ँल्लोकाननृणोऽनु सञ्चरति
तदेषाऽभ्युक्ता। अनृणा अस्मिन्ननृणाः परस्मिꣳ
स्तृतीये लोके अनृणास्स्याम। ये देवयाना
उत पितृयाणा स्सर्वान्पथो अनृणा
आक्षीयेमेत्यग्नि व्ँवै जातं पाप्मा जग्राह
तन्देवा आहुतीभिः पाप्मानमपाघ्नन्नाहुतीना-
य्ँयज्ञेन यज्ञस्य दक्षिणाभि र्दक्षिणानां ब्राह्मणेन
ब्राह्मणस्य छन्दोभिश्छन्दसाꣳस्वाद्ध्यायेना-
पहतपाप्मा स्वाद्ध्यायो देवपवित्र व्ँवा

एतत्तय्यँोऽनूँथ्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाऽभ्युक्ता।

यस्तित्याज सखिविद॑ सखायन्न तस्य वाच्यपि भागो अस्ति। यदी॑ शृणोत्यलक॑ शृणोति न हि प्रवेद सुकृतस्य पन्थामिति तस्माँथ्स्वाद्ध्यायोऽद्ध्येतव्यो यय्यँङ्क्रतुमधीते तेन तेनास्येष्टं भवत्यग्ने-र्वायोरादित्यस्य सायुज्यङ्गच्छति तदेषा-ऽभ्युक्ता।

ये अर्वाङुतवा पुराणे वेद-व्विँद्वा॑स-

मभितो वदन्त्यादित्यमेव ते परिवदन्ति सर्वे
अग्निन्द्वितीयन्तृतीयञ्च हꣳसमिति यावतीर्वै
देवता- स्तास्सर्वा वेदविदि ब्राह्मणे वसन्ति
तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवेदिवे
नमस्कुर्या- न्नाश्लीलङ्कीर्तयेदेता एव देवताः
प्रीणाति।। [१९]।।

*****

१६ रिच्यत इव वा एष प्रेवरिच्यते
यो याजयति प्रति वा गृह्णाति याजयित्वा
प्रतिगृह्य वाऽनश्नन् त्रिस्स्वाद्ध्याय ꣳवेद-

मधीयीत त्रिरात्रव्वाँ सावित्रीङ्गायत्रीमन्वाति-
रेचयति वरो दक्षिणा वरेणैव वरꣳ
स्पृणोत्यात्मा हि वरः।। [२०]।।

*****

१७ दुहे हवा एष छन्दाꣳसि यो
याजयति स येन यज्ञक्रतुना याजयेत्सोऽरण्यं
परेत्य शुचौ देशे स्वाद्ध्याय-मेवैन-मधीय-
न्नासीत तस्यानशन- न्दीक्षास्थान-मुपसद
आसनꣳ सुत्या वाग्जुहू-र्मन उपभृद्धृति
र्द्ध्रुवा प्राणो हवि स्सामाद्ध्वर्यु स्स वा एष

यज्ञः प्राण दक्षिणोऽनन्त दक्षिण स्समृद्धतरः ।।

[२१] ।। *******

१८ कतिधाऽवकीर्णी प्रविशति

चतुर्द्धेत्याहु ब्रह्मवादिनो मरुतः प्राणैरिन्द्रं

बलेन बृहस्पतिं ब्रह्मवर्चसेनाग्निमेवेतरेण

सर्वेण तस्यैतां प्रायश्चित्ति व्विँदाञ्चकार सुदेवः

काश्यपो यो ब्रह्मचार्यवकिरेदमावास्यांया ँ

रात्र्यामग्निं प्रणीयोपसमाधाय द्विराज्यस्यो-

पघात- ञ्जुहोति कामावकीर्णोऽस्म्य-

वकीर्णोऽस्मि कामकामाय स्वाहा

॥ तैत्तिरीयारण्यके द्वितीयः प्रश्नः ॥

कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि कामकामाय
स्वाहेत्यमृत व्वाँ आज्यममृत- मेवात्मन्धत्ते
हुत्वा प्रयताञ्जलिः कवातिर्यङ्ङग्निमभि-
मन्त्रयेत संमाऽसिञ्चन्तु मरुत स्समिन्द्र
स्संबृहस्पतिः। संमाऽयमग्नि स्सिञ्चत्वायुषा
च बलेन चायुष्मन्तङ्करोतमेति प्रति हास्मै
मरुतः प्राणान्दधति प्रतीन्द्रो बलं प्रति
बृहस्पति ब्रह्मवर्चसं प्रत्यग्निरितरथ्सर्वं
सर्वतनुर्भूत्वा सर्वमायुरेति त्रिरभिमन्त्रयेत
त्रिषत्या हि देवा योऽपूत इव मन्येत

स इत्थञ्जुहुया- दित्थमभिमन्त्रयेत पुनीत एवात्मानमायुरेवात्मन्धत्ते वरो दक्षिणा वरेणैव वरꣳ स्पृणोत्यात्मा हि वरः।। [२२]।।

*****

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

१९ भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये
भूर्भुवस्स्वः प्रपद्ये ब्रह्म प्रपद्ये ब्रह्मकोशं प्रपद्ये
ऽमृतं प्रपद्येऽमृतकोशं प्रपद्ये चतुर्जालं
ब्रह्मकोशय्यँं मृत्युर्नाव पश्यति तं प्रपद्ये देवान्
प्रपद्ये देवपुरं प्रपद्ये परीवृतो वरीवृतो ब्रह्मणा
वर्मणाऽहन्तेजसा कश्यपस्य यस्मै नम
स्तच्छिरो धर्मो मूर्द्धानं ब्रह्मोत्तराहनु र्यज्ञो
ऽधरा विष्णुर् हृदय ँ सव्वँथ्सरः प्रजनन-
मश्विनौ पूर्वपादावत्रि र्मद्ध्यं मित्रावरुणावपर-
पादावग्निः पुच्छस्य प्रथमङ्काण्डन्तत

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

इन्द्रस्ततः प्रजापतिरभयञ्चतुर्थꣳस वा एष दिव्यश्शाक्वर शिशुमारस्तꣳ ह य एवꣳ वेदापपुनर्मृत्युञ्जयति जयति स्वर्गल्लोँकन्नाद्ध्वनि प्रमीयते नाग्नौ प्रमीयते नाफ्सु प्रमीयते नानपत्यः प्रमीयते लघ्वान्नो भवति द्ध्रुवस्त्वमसि द्ध्रुवस्यक्षितमसि त्त्वं भूतानामधिपतिरसि त्त्वं भूतानाꣳ श्रेष्ठोऽसि त्त्वां भूतान्युप पर्यावर्तन्ते नमस्ते नमस्सर्वन्ते नमो नम शिशुकुमाराय नमः।।

****

२० नम॒ः प्राच्यै॑ दि॒शे याश्च॑ दे॒वता॑
ए॒त॒स्यां प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒-

नमो दक्षि॑णायै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒
प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒-

नम॒ः प्रती᳚च्यै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒
प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒-

नम॒ उदी᳚च्यै दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒
प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒-

नम॑ ऊ॒र्ध्वायै॑ दि॒शे याश्च॑ दे॒वता॑ ए॒तस्यां॒
प्रति॑वसन्त्ये॒ताभ्य॑श्च॒ नमो॒-

नमोऽधरायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो-

नमोऽवान्तरायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो-

नमो गङ्गा यमुनयो र्मद्ध्ये ये वसन्ति ते मे प्रसन्नात्मान-श्चिरञ्जीवित- वँर्द्धयन्ति

नमो गङ्गा यमुनयो र्मुनिभ्यश्च नमो नमो गङ्गा यमुनयो र्मुनिभ्यश्च नमः।।

****

।। तैत्तिरीयारण्यके द्वितीयः प्रश्नः ।।

सहरक्षाꣳसि यद्देवास्सप्तदश यददीव्यं पञ्चदशायुष्टे चतुस्त्रिꣳशद्वैश्वानराय षड्विꣳशति वातरशनाह कूश्माण्डैरजान् ह पञ्च ब्रह्मयज्ञेन ग्रामे मदुध्यन्दिने तस्य वै मेघस्तस्य वै द्वौ रिच्यते दुहेह कतिधावकीर्णी भूर्नमः प्राच्यै विꣳशतिः।।[२०]।। सहवातरशना दुहेह चतुर्विꣳशतिः।।[२४]।। सह वै मुनिभ्यश्च नमः।। हरिः ओ(३)म्।।

नमो ब्रह्मणे नमो अस्त्वग्नये
नमः पृथिव्यै नम ओषधीभ्यः।
नमो वाचे नमो वाचस्पतये
नमो विष्णवे बृहते करोमि।।
ओं शान्तिश्शान्तिश्शान्तिः।।

(इति तैत्तिरीयारण्यके द्वितीयः प्रश्नस्समाप्तः)

****